# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ४

श्रुत्वा हनूमतो वाक्यं यथावदनुपूर्वशः ।
ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः ॥१॥

यां निवेदयसे लङ्कां पुरीं भीमस्य रक्षसः ।
क्षिप्रमेनां वधिष्यामि सत्यमेतद्ब्रवीमि ते ॥२॥

अस्मिन्मुहूर्ते सुग्रीव प्रयाणमभिरोचये ।
युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः ॥३॥

उत्तरा फल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते ।
अभिप्रयाम सुग्रीव सर्वानीकसमावृताः ॥४॥

निमित्तानि च धन्यानि यानि प्रादुर्भवन्ति मे ।
निहत्य रावणं सीतामानयिष्यामि जानकीम् ॥५॥

उपरिष्टाद्धि नयनं स्फुरमाणमिदं मम ।
विजयं समनुप्राप्तं शंसतीव मनोरथम् ॥६॥

अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम् ।
वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥७॥

फलमूलवता नील शीतकाननवारिणा ।
पथा मधुमता चाशु सेनां सेनापते नय ॥८॥

दूषयेयुर्दुरात्मानः पथि मूलफलोदकम् ।
राक्षसाः परिरक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ॥९॥

निम्नेषु वनदुर्गेषु वनेषु च वनौकसः ।
अभिप्लुत्याभिपश्येयुः परेषां निहतं बलम् ॥१०॥

सागरौघनिभं भीममग्रानीकं महाबलाः ।
कपिसिंहा प्रकर्षन्तु शतशोऽथ सहस्रशः ॥११॥

गजश्च गिरिसङ्काशो गवयश्च महाबलः ।
गवाक्षश्चाग्रतो यान्तु गवां दृप्ता इवर्षभाः ॥१२॥

यातु वानरवाहिन्या वानरः प्लवतां पतिः ।
पालयन्दक्षिणं पार्श्वमृषभो वानरर्षभः ॥१३॥

गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः ।
यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥१४॥

यास्यामि बलमध्येऽहं बलौघमभिहर्षयन् ।
अधिरुह्य हनूमन्तमैरावतमिवेश्वरः ॥१५॥

अङ्गदेनैष संयातु लक्ष्मणश्चान्तकोपमः ।
सार्वभौमेण भूतेशो द्रविणाधिपतिर्यथा ॥१६॥

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ।
ऋक्षराजो महासत्त्वः कुक्षिं रक्षन्तु ते त्रयः ॥१७॥

राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः ।
व्यादिदेश महावीर्यान्वानरान्वानरर्षभः ॥१८॥

ते वानरगणाः सर्वे समुत्पत्य युयुत्सवः ।
गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा ॥१९॥

ततो वानरराजेन लक्ष्मणेन च पूजितः ।
जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥२०॥

शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ।
वारणाभिश्च हरिभिर्ययौ परिवृतस्तदा ॥२१॥

तं यान्तमनुयाति स्म महती हरिवाहिनी ॥२२॥

हृष्टाः प्रमुदिताः सर्वे सुग्रीवेणाभिपालिताः ।
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
क्ष्वेलन्तो ननदन्तश्च जग्मुर्वै दक्षिणां दिशम् ॥२३॥

भक्षयन्तः सुगन्धीनि मधूनि च फलानि च ।
उद्वहन्तो महावृक्षान्मञ्जरीपुञ्जधारिणः ॥२४॥

अन्योन्यं सहसा दृष्टा निर्वहन्ति क्षिपन्ति च ।
पतन्तश्चोत्पतन्त्यन्ये पातयन्त्यपरे परान् ॥२५॥

रावणो नो निहन्तव्यः सर्वे च रजनीचराः ।

इति गर्जन्ति हरयो राघवस्य समीपतः ॥ २६ ॥

पुरस्तादृषभ्हो वीरो नीलः कुमुद एव च ।
पथानं शोधयन्ति स्म वानरैर्बहुभिः सह ॥ २७ ॥

मध्ये तु राजा सुग्रीवो रामो लक्ष्मण एव च ।
बहुभिर्बलिभिर्भीमैर्वृताः शत्रुनिबर्हणः ॥ २८ ॥

हरिः शतबलिर्वीरः कोटीभिर्दशभिर्वृतः ।
सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम् ॥ २९ ॥

कोटीशतपरीवारः केसरी पनसो गजः ।
अर्कश्चातिबलः पार्श्वमेकं तस्याभिरक्षति ॥ ३० ॥

सुषेणो जाम्बवांश्चैव ऋक्षैर्बहुभिरावृतः ।
सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः ॥ ३१ ॥

तेषां सेनापतिर्वीरो नीलो वानरपुङ्गवः ।
सम्पतन्पततां श्रेष्ठस्तद्बलं पर्यपालयत् ॥ ३२ ॥

दरीमिखः प्रजङ्घश्च जम्भोऽथ रभसः कपिः ।
सर्वतश्च ययुर्वीरास्त्वरयन्तः प्लवङ्गमान् ॥ ३३ ॥

एवं ते हरिशार्दूला गच्छन्तो बलदर्पिताः ।
अपश्यंस्ते गिरिश्रेष्ठं सह्यं द्रुमलतायुतम् ॥ ३४ ॥

सागरौघनिभं भीमं तद्वानरबलं महत् ।
निःससर्प महाघोषं भीमवेग इवार्णवः ॥ ३५ ॥

तस्य दाशरथेः पार्श्वे शूरास्ते कपिकुञ्जराः ।
तूर्णमापुप्लुवुः सर्वे सदश्वा इव चोदिताः ॥ ३६ ॥

कपिभ्यामुह्यमानौ तौ शुशुभते नरर्षभौ ।
महद्भ्यामिव संस्पृष्टौ ग्राहाभ्यां चन्द्रभास्करौ ॥ ३७ ॥

तमङ्गदगतो रामं लक्ष्मणः शुभया गिरा ।
उवाच प्रतिपूर्णार्थः स्मृतिमान्प्रतिभानवान् ॥ ३८ ॥

हृतामवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम् ।
समृद्धार्थः समृद्धार्थामयोध्यां प्रतियास्यसि ॥ ३९ ॥

महान्ति च निमित्तानि दिवि भूमौ च राघव ।
शुभान्ति तव पश्यामि सर्वाण्येवार्थसिद्धये ॥ ४० ॥

अनु वाति शुभो वायुः सेनां मृदुहितः सुखः ।
पूर्णवल्गुस्वराश्चेमे प्रवदन्ति मृगद्विजाः ॥ ४१ ॥

प्रसन्नाश्च दिशः सर्वा विमलश्च दिवाकरः ।
उशना च प्रसन्नार्चिरनु त्वां भार्गवो गतः ॥ ४२ ॥

ब्रह्मराशिर्विशुद्धश्च शुद्धाश्च परमर्षयः ।
अर्चिष्मन्तः प्रकाशन्ते ध्रुवं सर्वे प्रदक्षिणम् ॥ ४३ ॥

त्रिशङ्कुर्विमलो भाति राजर्षिः सपुरोहितः ।
पितामहवरोऽस्माकमिष्वाकूणां महात्मनाम् ॥ ४४ ॥

विमले च प्रकाशेते विशाखे निरुपद्रवे ।
नक्षत्रं परमस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ४५ ॥

नैरृतं नैरृतानां च नक्षत्रमभिपीड्यते ।
मूलं मूलवता स्पृष्टं धूप्यते धूमकेतुना ॥ ४६ ॥

सरं चैतद्विनाशाय राक्षसानाम् उपस्थितम् ।
काले कालगृहीतानां नकत्रं ग्रहपीडितम् ॥ ४७ ॥

प्रसन्नाः सुरसाश्चापो वनानि फलवन्ति च ।
प्रवान्त्यभ्यधिकं गन्धा यथर्तुकुसुमा द्रुमाः ॥ ४८ ॥

व्यूढानि कपिसैन्यानि प्रकाशन्तेऽधिकं प्रभो ।
देवानामिव सैन्यानि सङ्ग्रामे तारकामये ॥ ४९ ॥

एवमार्य समीक्ष्यैतान्प्रीतो भवितुमर्हसि ।
इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत् ॥ ५० ॥

अथावृत्य महीं कृत्स्नां जगाम महती चमूः ।
ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैर्वृता ॥ ५१ ॥

कराग्रैश्चरणाग्रैश्च वानरैरुद्धतं रजः ।
भौममन्तर्दधे लोकं निवार्य सवितुः प्रभाम् ॥ ५२ ॥

सा स्म याति दिवारात्रं महती हरिवाहिनी ।
हृष्टप्रमुदिता सेना सुग्रीवेणाभिरक्षिता ॥ ५३ ॥

वनरास्त्वरितं यान्ति सर्वे युद्धाभिनन्दनः ।
मुमोक्षयिषवः सीतां मुहूर्तं क्वापि नासत ॥ ५४ ॥

ततः पादपसम्बाधं नानामृगसमाकुलम् ।
सह्यपर्वतमासेदुर्मलयं च मही धरम् ॥ ५५ ॥

काननानि विचित्राणि नदीप्रस्रवणानि च ।

पश्यन्नपि ययौ रामः सह्यस्य मलयस्य च ॥ ५६॥

चम्पकांस्तिलकांश्चूतानशोकान्सिन्दुवारकान् ।
करवीरांश्च तिमिशान्भञ्जन्ति स्म प्लवङ्गमाः ॥ ५७॥

फलान्यमृतगन्धीनि मूलानि कुसुमानि च ।
बुभुजुर्वानरास्तत्र पादपानां बलोत्कटाः ॥ ५८॥

द्रोणमात्रप्रमाणानि लम्बमानानि वानराः ।
ययुः पिबन्तो हृष्टास्ते मधूनि मधुपिङ्गलाः ॥ ५९॥

पादपानवभञ्जन्तो विकर्षन्तस्तथा लताः ।
विधमन्तो गिरिवरान्प्रययुः प्लवगर्षभाः ॥ ६०॥

वृक्षेभ्योऽन्ये तु कपयो नर्दन्तो मधुदर्पिताः ।
अन्ये वृक्षान्प्रपद्यन्ते प्रपतन्त्यपि चापरे ॥ ६१॥

बभूव वसुधा तैस्तु सम्पूर्णा हरिपुङ्गवैः ।
यथा कमलकेदारैः पद्मैरिव वसुन्धरा ॥ ६२॥

महेन्द्रमथ सम्प्राप्य रामो राजीवलोचनः ।
अध्यारोहन्महाबाहुः शिखरं द्रुमभूषितम् ॥ ६३॥

ततः शिखरमारुह्य रामो दशरथात्मजः ।
कूर्ममीनसमाकीर्णमपश्यत्सलिलाशयम् ॥ ६४॥

ते सह्यं समतिक्रम्य मलयं च महागिरिम् ।
आसेदुरानुपूर्व्येण समुद्रं भीमनिःस्वनम् ॥ ६५॥

अवरुह्य जगामाशु वेलावनमनुत्तमम् ।
रामो रमयतां श्रेष्ठः ससुग्रीवः सलक्ष्मणः ॥ ६६॥

अथ धौतोपलतलां तोयौघैः सहसोत्थितैः ।
वेलामासाद्य विपुलां रामो वचनमब्रवीत् ॥ ६७॥

एते वयमनुप्राप्ताः सुग्रीव वरुणालयम् ।
इहेदानीं विचिन्ता सा या न पूर्वं समुत्थिता ॥ ६८॥

अतः परमतीरोऽयं सागरः सरितां पति ।
न चायमनुपायेन शक्यस्तरितुमर्णवः ॥ ६९॥

तदिहैव निवेशोऽस्तु मन्त्रः प्रस्तूयताम् इह ।
यथेदं वानरबलं परं पारमवाप्नुयात् ॥ ७०॥

इतीव स महाबाहुः सीताहरणकर्शितः ।
रामः सागरमासाद्य वासमाज्ञापयत्तदा ॥ ७१॥

सम्प्राप्तो मन्त्रकालो नः सागरस्येह लङ्घने ।
स्वां स्वां सेनां समुत्सृज्य मा च कश् चित्कुतो व्रजेत् ।
गच्छन्तु वानराः शूरा ज्ञेयं छद्मं भयं च नः ॥ ७२॥

रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः ।
सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते ॥ ७३॥

विरराज समीपस्थं सागरस्य तु तद्बलम् ।
मधुपाण्डुजलः श्रीमान्द्वितीय इव सागरः ॥ ७४॥

वेलावनमुपागम्य ततस्ते हरिपुङ्गवाः ।
विनिविष्टाः परं पारं काङ्क्षमाणा महोदधेः ॥ ७५॥

सा महार्णवमासाद्य हृष्टा वानरवाहिनी ।
वायुवेगसमाधूतं पश्यमाना महार्णवम् ॥ ७६॥

दूरपारमसम्बाधं रक्षोगणनिषेवितम् ।
पश्यन्तो वरुणावासं निषेदुर्हरियूथपाः ॥ ७७॥

चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये ।
चन्द्रोदये समाधूतं प्रतिचन्द्रसमाकुलम् ॥ ७८॥

चण्डानिलमहाग्राहैः कीर्णं तिमितिमिङ्गिलैः ।
दीप्तभोगैरिवाक्रीर्णं भुजङ्गैर्वरुणालयम् ॥ ७९॥

अवगाढं महासत्त्वैर्नानाशैलसमाकुलम् ।
दुर्गं दुर्गममार्गं तमगाधमसुरालयम् ॥ ८०॥

मकरैर्नागभोगैश्च विगाढा वातलोहिताः ।
उत्पेतुश्च निपेतुश्च प्रवृद्धा जलराशयः ॥ ८१॥

अग्निचूर्णमिवाविद्धं भास्कराम्बुमनोरगम् ।
सुरारिविषयं घोरं पातालविषमं सदा ॥ ८२॥

सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् ।
सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥ ८३॥

सम्पृक्तं नभसा ह्यम्भः सम्पृक्तं च नभोऽम्भसा ।
तादृग्रूपे स्म दृश्येते तारा रत्नसमाकुले ॥ ८४॥

समुत्पतितमेघस्य वीचि मालाकुलस्य च ।
विशेषो न द्वयोरासीत्सागरस्याम्बरस्य च ॥ ८५॥

अन्योन्यैराहताः सक्ताः सस्वनुर्भीमनिःस्वनाः ।

ऊर्मयः सिन्धुराजस्य महाभेर्य इवाहवे ॥ ८६ ॥

रत्नौघजलसंनादं विषक्तमिव वायुना ।
उत्पतन्तमिव क्रुद्धं यादोगणसमाकुलम् ॥ ८७ ॥

ददृशुस्ते महात्मानो वाताहतजलाशयम् ।
अनिलोद्धूतमाकाशे प्रवल्गतमिवोर्मिभिः ।
भ्रान्तोर्मिजलसंनादं प्रलोलमिव सागरम् ॥ ८८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com